# Shri Parijnanashrama Trayodashi

# श्रीपरिज्ञानाश्रमत्रयोदशी

## Document Information

Text title : parijnAnAshramatrayodashI

File name : parijnAnAshramatrayodashI.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Shri Ganesha Shatavadhani

Proofread by : NA

Source : Shri Chitrapura Stuti Manjari,3rd ed. 2008

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : March 2, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 19, 2020

*sanskritdocuments.org*

# श्रीपरिज्ञानाश्रमत्रयोदशी

आनन्दाश्रमशिष्याग्र्यं स्वानन्दाम्बुधिमज्जितम् ।
आनन्दाश्रमिणं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १॥

श्रीविद्योपासनोद्याने मायूरं विभ्रमं सदा ।
यश्चक्रे तं नमो नित्यं परिज्ञानाश्रमं गुरुम् ॥ २॥

बाल्ये दीपनमस्कारे यस्य वैराग्यधीशिखा ।
जज्वाल तं सदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ३॥

शिष्यान्तश्शोधने यद्वत्तद्वद्यन्त्रालिशोधने ।
कौतुकं यस्य तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ४॥

भवरोगहरो योऽभूच्छिवयोगपरोऽनिशम् ।
त वन्दे सिद्धिसम्पन्नं परिज्ञानाश्रमं गुरुम् ॥ ५॥

शुनि चैव समदृष्टा ज्ञानीत्यागमदृष्टये ।
आसीद्यस्तं नुमो हार्दं परिज्ञानाश्रमं गुरुम् ॥ ६॥

सारस्वतजनप्रीतस्सारस्वतसमर्चकः ।
य आसीत् तं मुदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ७॥

विद्यावृद्धस्तपोवृद्धो वयोवृद्धाश्रयो बभौ ।
य कारुण्येन तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ८॥

योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।
वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥ ९॥

निर्मिमे निर्ममेन्द्रो यः स्तवान् वेदान्तवासितान् ।
गीतासक्तं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥ १०॥

कैवल्यसंनिकर्षत्वे तथाहंग्रहचिन्तने ।
यस्यासीद्हृदयं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ११॥

भक्तचेतोरथाध्यक्षो रथयात्रां महेशितुः ।
यश्चक्रे तं नुमोऽजस्रं परिज्ञानाश्रमं गुरुम् ॥ १२॥

दुर्गं निर्माय दुर्गायै स्वसर्गं यो रुरोधतम् ।
अपवर्गप्रदं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १३॥

श्रीश्रीपरिज्ञानाश्रमयतीश्वराणां
तुर्याश्रमालङ्कृतिरूपकाणाम् ।
स्तोत्रं पठेद्यः प्रयतः प्रणम्रः ।
प्राप्नोति पूर्णां करुणां गुरूणाम् ॥

इति श्रीगणेश शतावधानीमहोदयविरचिता
श्रीपरिज्ञानाश्रमत्रदयोदशी समाप्ता ।

---

*Shri Parijnanashrama Trayodashi*

pdf was typeset on December 19, 2020

Please send corrections to *sanskrit@cheerful.com*